# महर्षिः वशिष्ठः

**प्राचीनायां ऋषिपरम्परायां महर्षेः वशिष्ठस्य अन्यतमं स्थानमस्ति। सप्तर्षिषु अस्य गणना भवति। महर्षिः वशिष्ठः इक्ष्वाकुवंशीयनृपाणां कुलगुरुः इति प्रसिद्धः। अस्मिन् पाठे महर्षेः वशिष्ठस्य जीवनपरिचयः कृतित्वपरिचयश्च सम्पादितौ सिद्धान्ताश्च प्रस्तुताः। आदर्शराज्यं किमस्ति ? आदर्शप्रजाजीवनं कीदृशं भवेत् ? इति 'शासनाभाववादः' सम्यग्रूपेण प्रतिपादितः।**

उर्वशीमैत्रावरुणयोः पुत्रः वशिष्ठः। किन्तु पौराणिककथानुसारं वशिष्ठः ब्रह्मदेवस्य दशमानसपुत्रेषु एव एकः इति उल्लेखः अपि प्रसिद्धः। विपाशानद्याः तीरे वशिष्ठः तपः कृतवान्। यस्याः शिलायाः उपरि सः उपविष्टवान् सा शिला ''वशिष्ठशिला'' इति उच्यते। तदनन्तरं सः भारतभ्रमणं कृतवान्। भारतभ्रमणसमये सः सावित्र्याः आश्रमं गतवान्। तत्र अदितिकश्यपयोः कन्याम् अरुन्धतीं दृष्ट्वा वशिष्ठः प्रभावितः अभवत्। वशिष्ठस्य विद्वत्तायाः कीर्तिरपि सर्वत्र प्रसृता आसीत्। ''रत्नं समागच्छतु काञ्चनेन'' इति न्यायेन एतयोः विवाहः सञ्जातः।

वशिष्ठस्य अद्भुतस्य प्रयोगस्य नाम आसीत् - ''शासनाभाववादः''। किं कोऽपि मां पश्यति अतः अहं सम्यक्तया आचरामि ? राजा शासनं करोति अतः अहं नियमानां पालनं करोमि इति न। अपि तु अहं मम सदसद्विवेकबुद्धिं स्मृत्वा एव आचरिष्यामि। तेन शासकस्य आवश्यकता कदापि न भविष्यति। एतादृशः अयं समाजोन्नतेः प्रयोगः शासनाभाववादः।

*न राज्यं न च राजासीत् न दण्डो न च दाण्डिकः।*
*धर्मेणैव प्रजास्तावत् रक्षन्तीह परस्परम् ॥*

इति तस्य राज्यपद्धति-विचारः। भारतीय-संस्कृतौ एतस्य एव पापपुण्ये एते द्वे कल्पने स्तः। एवं क्रियते चेत् पापं भवति इति कल्पना यदि मनसि दृढा भवति तर्हि कोऽपि एकान्तेऽपि धर्मभ्रष्टः न भवति। अयमेव मानसशास्त्रीयः आधारः वशिष्ठेन शासनाभाववादे स्थापितः।

वशिष्ठेन सुदासस्य राज्ये अपि शासनाभाववादः दृढीकृतः। समाज-दिग्दर्शनार्थं नैके ग्रन्थाः रचिताः। गद्यपद्यमयः विशिष्टः ''वशिष्ठ-धर्मसूत्रम्'' नामकः ग्रन्थः रचितः। ''वशिष्ठस्मृतिः'' निर्मिता। दर्शेष्टिः पूर्णमासेष्टिः एतयोः सुवर्णमध्यम् आचरन् सः ''वशिष्ठयज्ञम्'' जगति रूढं कृतवान्। एतासां सर्वासां कृतीनाम् एकमेव प्रयोजनं ''विश्वकल्याणम्'' इति।

वशिष्ठस्य अद्भुतायाः प्रज्ञायाः तथा अभूतपूर्वायाः प्रयोगजिज्ञासायाः वयं कल्पनामपि कर्तुं न शक्नुमः। यद्यपि शासनाभाववादः समाजे यशस्वी अभवत् तथापि तस्य मनसि अयं विचारः आसीत्-यावत् सम्पूर्णा प्रजा सदाचरिणी अस्ति विवेकिनी अस्ति पापभीरुः च अस्ति तावत् एव इयं शासनरीतिः उपयुक्ता। अन्यथा एतादृशी समा अन्या घातक-प्रक्रिया नास्ति। अतः एव तेन अन्यः प्रयोगः आरब्धः। नियन्त्रिता राजसत्ता। अस्य प्रयोगस्य मध्यबिन्दुः भगवान् श्रीरामचन्द्रः आसीत्। वशिष्ठस्य आचार्यत्वं सः प्राप्नोत्। वशिष्ठः ज्ञानी आसीत्। केवलं मन्त्रविद्यया वा शास्त्राभ्यासेन, राजकीयकौशलेन पवित्रचारित्र्येण सर्वं शक्यं न भवति।

तन्त्राणां तथैव शस्त्राणाम् अपि ज्ञानम् आवश्यकम्। अत: विश्वामित्र: तन्त्रे तथा शस्त्रस्य क्षेत्रे अपि निपुण: इति ज्ञात्वा वशिष्ठ: श्रीरामचन्द्रं तस्य समीपे अध्ययनार्थं प्रेषितवान्। वशिष्ठविश्वामित्रयो: सहयोगेन श्रीराम: परिपूर्ण: अभवत्। रावणविनाशान्तरं रामराज्यं तेन प्रस्थापितम्। नियन्त्रिता राजसत्ता तेन निर्मिता।

नियन्त्रिताया: राजसत्ताया: कृते वशिष्ठ: ''योगवाशिष्ठम्'' नामकस्य असामान्यस्य तन्त्रस्य रचनां कृतवान्। रामराज्यस्य कृते वशिष्ठेन उक्ता इयं मौखिकी घटना इव।

*तरवोऽपि हि जीवन्ति जीवन्ति मृगपक्षिण:।*
*स: जीवति मनो यस्य मननेनोपजीवति॥*

इदं योगवाशिष्ठस्य आधारतत्त्वम्। मननमित्येव मानवतत्त्वस्य लक्षणम् इति तेन उक्तम्।

## शब्दार्थ:

उपविष्टवान् - अतिष्ठत् (बैठे)। कृतवान् - अकरोत् (किया)। प्रसृता - प्रसारितम् आसीत् प्रसारिता। सञ्जात: - अभवत्। स्मृत्वा - स्मरणं कृत्वा। तरव: - वृक्षा:। मननम् - चिन्तनम्। नियन्त्रिताया: - मर्यादिताया:।

## अभ्यास:

1. **एकपदेन उत्तरत -**

(क) ब्रह्मदेवस्य दशमानसपुत्रेषु क: प्रसिद्ध: ?

(ख) कस्या: नद्या: तीरे वशिष्ठ: तप: कृतवान् ?

(ग) वशिष्ठ: कस्या: आश्रमं गतवान् ?

(घ) वशिष्ठस्य विवाह: केन न्यायेन सञ्जात: ?

(ङ) गद्यपद्यमय: विशिष्ट: क: ग्रन्थ: वशिष्ठेन रचित: ?

2. **एकवाक्येन उत्तरत -**

(क) अरुन्धत्या: विवाह: केन सह अभवत् ?

(ख) समाजोन्नते: प्रयोग: क: ?

(ग) वशिष्ठस्य सर्वासां कृतीनां प्रयोजनं किम् ?

(घ) नियन्त्रितराजसत्ताया: मध्यबिन्दु: क: आसीत् ?

(ङ) वसिष्ठ: रामचन्द्रं कस्य समीपे अध्ययनार्थं प्रेषितवान् ?

3. **त्रिचतुर्भिर्वाक्यै: विवरणं लिखत -**

(क) शासनाभाववाद:।

(ख) नियन्त्रिता राजसत्ता।

**4. रिक्तस्थानानि पूरयत –**

(क) .............................. इति एव मानवतत्त्वस्य लक्षणमस्ति।

(ख) योगवाशिष्ठस्य रचनां ................................ कृते कृतवान्।

(ग) वशिष्ठस्मृतिः .............................. निर्मिता।

(घ) .................................... जगति रुढं कृतवान्।

(ङ) वशिष्ठस्य सर्वासां कृतीनां प्रयोजनं ........................... अस्ति।

(च) यावत् सम्पूर्णा प्रजा सदाचारिणी विवेकिनी पापभीरुश्चास्ति तावत् ......................... रीतिः उपयुक्ता।

(छ) विश्वामित्रः ....................... तथा ....................... क्षेत्रे निपुणः आसीत्।

**5. युग्ममेलनं कुरुत –**

| | 'अ' | 'आ' |
|---|---|---|
| (क) | अरुन्धती | विश्वामित्रम् |
| (ख) | सुदासस्य राज्ये | विपाशानद्याः |
| (ग) | तपः | वशिष्ठः |
| (घ) | शस्त्रज्ञानार्थम् | नियन्त्रितराजसत्ता |
| (ङ) | श्रीरामचन्द्रः | शासनाभाववादः |

**6. अधोलिखितपदानां विभक्तिं वचनञ्च लिखत –**

(क) रचनाम्

(ख) वशिष्ठेन

(ग) राज्ये

(घ) एतयोः

(ङ) वयम्

(च) रामचन्द्रः

(छ) देवी

(ज) अयम्

**7. अधोलिखितक्रियापदानां लकारं पुरुषं वचनञ्च लिखत –**

| क्रियापदम् | लकारः | पुरुषः | वचनम् |
|---|---|---|---|
| अभवत् | | | |
| स्तः | | | |
| आचरिष्यामि | | | |
| अगच्छत् | | | |
| कुर्वः | | | |

8. **प्रकृतिप्रत्ययौ पृथक् कुरुत –**

(क) स्मृत्वा

(ख) आचरन्

(ग) कर्तुम्

(घ) कृत:

(ङ) गतवान्

9. **अधोलिखितानि पदान्याधृत्य वाक्यनिर्माणं कुरुत –**

(क) इदम्

(ख) कृते

(ग) इति

(घ) सर्वत्र

(ङ) एव

10. **अधोलिखितश्लोकयो: अन्वयं कुरुत –**

(क) ***तरवोऽपि हि जीवन्ति जीवन्ति मृगपक्षिण: ।***
***स: जीवति मनो यस्य मननेनोपजीवति ।।***

(ख) ***न राज्यं न च राजासीत् न दण्डो न च दाण्डिक: ।***
***दण्डेनैव प्रजास्तावत् रक्षन्तीह परस्परम् ।।***

**योग्यताविस्तार: –**

- वशिष्ठविरचितानाम् अन्यानां ग्रन्थानां नामानि लिखत ।
- पाठे समागतानि विशेषण-विशेष्यपदानि चित्वा लिखत ।